# Gananatha Stuti by Vairatadeva

# ગણનાથસ્તુતિઃ વૈરાટદેવેન કૃતા

## Document Information

Text title : Gananatha Stuti by Vairatadeva

File name : gaNanAthastutiHvairATadevenakRRitA.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : NA

Proofread by : NA

Description/comments : Mudgalapurana, Khanda 1, Adhyaya 10

Latest update : April 23, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

Gananatha Stuti by Vairatadeva

# ગણનાથસ્તુતિઃ વૈરાટદેવેન કૃતા

શ્રીગણેશાય નમઃ ।
પાર્વત્યુવાચ ।
શ્રોતુમિચ્છામિ સર્વેશ વિરાજશ્ચ સ્વરૂપકમ્ ।
કીદૃશોઽયં મહાભાગ તન્મે કથય શઙ્કર ॥ ૧॥

શિવ ઉવાચ ।
પઞ્ચકોટિપ્રવિસ્તારે યોજનાનાં સમન્તતઃ ।
તસ્ય દેહે ચ ભૂતાનિ સ્થાવરાણિ ચરાણિ ચ ॥ ૨॥

સંસ્થિતાનિ ચ સર્વાણિ ભુવનાનિ ચતુર્દશ ।
તત્તેઽહં સંપ્રવક્ષ્યામિ સમાહિતમનાઃ શૃણુ .. ..

પાદયોસ્તસ્ય પાતાલં ગુલ્ફે તસ્ય રસાતલમ્ ।
પાષ્ણ્યોર્મહાતલં તસ્ય જઙ્ઘયોશ્ચ તલાતલમ્ ॥ ૪॥

સુતલં જાનુભાગેઽસ્ય વિતલં તૂરુમણ્ડલે ।
અતલં કટિસન્ધૌ ચ કટયાં ભૂલોકસંસ્થિતિઃ ॥ ૫॥

નાભૌ તસ્ય ભુવર્લોકઃ સ્વર્લોકશ્ચ હૃદિ સ્થિતઃ ।
મહર્લોકશ્ચ કણ્ઠે વૈ જનો લોકો મુખે સ્થિતઃ ॥ ૬॥

તપો લોકો લલાટે ચ સત્યલોકઃ શિરઃસ્થિતઃ ।
એતાવદ્દેહરૂપો વૈ વિરાટ્ સ પુરુષો મહાન્ ॥ ૭॥

સહસ્રશીર્ષશોભાઢ્યઃ સહસ્રાનનપાદવાન્ ।
સહસ્રહસ્તકર્ણઃ સ સહસ્રોદરવાન્ પ્રભુઃ ॥ ૮॥

સર્વત્ર વ્યાપ્યભાવેન સ્થિતોઽસૌ પરમેશ્વરઃ ।
મર્ત્યેષ્વમૃતભોક્તા ચ સ્વપ્રકાશેન વર્તતે ॥ ૯॥

તસ્યાન્તરે સ્થિતં રૂપં નામ્ના હૈરણ્યગર્ભકમ્ ।

એતાદૃશં તથા સ્વપ્નં વિશ્વરૂપં વિરાજતિ ॥ ૧૦॥

બહિર્વૈશ્વાનરશ્ચાયં જાગ્રદ્વૈરાટસંજ્ઞિતઃ ।
હિરણ્યગર્ભકોશસ્થઃ સ્વપ્નવૈરાટધારકઃ ॥ ૧૧॥

ઉભયોઃ સમભાવેન બાહ્યાન્તરસરૂપતઃ ।
ઈશ્વરો નામ વૈરાટઃ સુષુપ્તેર્ધારકો બભૌ ॥ ૧૨॥

ત્રિવિધં યદ્વિરાડ્ રૂપં કથિતં તે તુ પાર્વતિ ।
તુરીયમાત્મરૂપં યત્ ત્રિવિધેષુ પ્રવર્તતે ॥ ૧૩॥

અથ શ ૃણુ વિભિન્નાનામુત્પત્તિં ત્વલ્પભાવનામ્ ।
નાનાભાવધરાં તાં વૈ ચરાચરમયીં પરામ્ ॥ ૧૪॥

વિરાડજ્ઞાનભાવેનાવૃતસ્તેન તપઃ કૃતમ્ ।
એકાક્ષરવિધાનેન ગણેશં સન્દધૌ હૃદિ ॥ ૧૫॥

સોઽતપત્તપ ઉગ્રં ચ દિવ્યવર્ષસહસ્રકમ્ ।
તપસા ધ્યાનભાવેન પ્રત્યક્ષો ગણપોઽભવત્ ॥ ૧૬॥

બોધયામાસ તં દેવો વરં બ્રૂહીતિ સોઽબ્રવીત્ ।
ગણેશં સહસા દૃષ્ટ્વા પાદયોઃ પ્રણનામ તમ્ ॥ ૧૭॥

ધન્યં જન્મ તપો મેઽદ્ય ધન્યં જ્ઞાનં વપુશ્ચ દૃક્ ।
ધન્યા મે સમ્પદો દેવ ત્વદઙ્ઘ્રિયુગદર્શનાત્ ॥ ૧૮॥

ઇત્યુક્ત્વા સ્તોતુમારેભે ગણેશં બ્રહ્મનાયકમ્ ।
વાચા સંસ્પષ્ટયા હૃષ્ટો ભગવાન્ વિશ્વધારકઃ ॥ ૧૯॥

વિરાડુવાચ ।
નમસ્તે ગણનાથાય ગણાનાં પતયે નમઃ ।
વિઘ્નેશાય પરેશાય વિઘ્નહર્ત્રે નમો નમઃ ॥ ૨૦॥

સિદ્ધિબુદ્ધિપતે તુભ્યં નાનાસિદ્ધિપ્રદાયિને ।
નાનાજ્ઞાનપ્રદાત્રે ચ બ્રહ્મણે બ્રહ્મરૂપિણે ॥ ૨૧॥

મનોવાગતિભૂતાય યોગિનાં હૃદિ વાસિને ।
નાનાવતારકર્ત્રે ચ ભક્તસંરક્ષકાય તે ॥ ૨૨॥

નમો નમો મહેશાય શિવાય શિવદાયિને ।
સર્વત્ર સમભાવાય વિષ્ણવ પ્રભવિષ્ણવે ॥ ૨૩॥

તેજોરાશિપતે તુભ્યં ભાનવે તે નમો નમઃ ।
નાનામાયાપ્રભેદાત્મશક્તયે શક્તિરૂપિણે ॥ ૨૪॥

સ્રષ્ટ્રે પાત્રે ચ સંહર્ત્રે ચરાચરમયાય ચ ।
સર્વેભ્યો જ્ઞાનદાત્રે ચ નિર્મલાય નમો નમઃ ॥ ૨૫॥

સર્વેભ્યો ભિન્નરૂપાય માયાહીનાય તે નમઃ ।
માયિભ્યો મોહદાત્રે ચ માયાધારાય તે નમઃ ॥ ૨૬॥

ગુણાન્તં ન યયુર્યસ્ય નાનાબ્રહ્માણિ તે નમઃ ।
અતો મયિ ગણેશાન કૃપયાઽનુગ્રહં કુરુ ॥ ૨૭॥

ઇતિ સ્તુત્વા ગણેશાનં મૌનવાનભવત્સ્વયમ્ ।
વૈરાટઃ પુરુષસ્તત્ર કૃતાઞ્જલિપુટઃસ્થિતઃ ॥ ૨૮॥

ભગવાંસ્તં ગણેશાન ઊચિવાન્ ભક્તિભાવિતઃ ।
વરં વરય દાસ્યામિ શઙ્કાં મા કુરુ વિશ્વપ ॥ ૨૯॥

ઇદં ત્વયા કૃતં સ્તોત્રં મમ પ્રીતિકરં ભવેત ।
યઃ પઠેદ્ભાવપૂર્વં તુ સિદ્ધિસ્તસ્ય ભવિષ્યતિ ॥ ૩૦॥

યં યં ચિન્તયતે કામં તં તં દાસ્યામિ વાઞ્છિતમ્ ।
ભુક્તિમુક્તિપ્રદં ભાવિ પઠનાચ્છ્રવણાદપિ ॥ ૩૧॥

ઇતિ વૈરાટદેવેન કૃતા ગણનાથસ્તુતિઃ સમાપ્તા । ૧.૧૦

*Gananatha Stuti by Vairatadeva*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*